दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़शुक्लचतुर्दशी
श्रावण 12 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-278 1 जुलाई 28, 2026 Website- www.himsanskritam.com Email-himsanskrit@gmail.com

2 भाजपा-कार्यकालस्य प्रश्नपत्र-प्रकटनस्य, नियुक्ति- घोटालानां च उपरि आनेष्यामः श्वेतपत्रम्, मन्त्रिमण्डले गमिष्यति

3 बांकीपुर-क्षेत्रे भाजपा-दलस्य विशालं शक्तिप्रदर्शनम्, नितिननवीन-सम्राटचौधरिणोः मार्गयात्रायां जनसमुद्रः सम्मर्दितः

5 क्षेत्रीयसङ्घटनमन्त्रिणा सह संस्कृतभारतीदेहरादूनस्य कार्यकर्तॄणां सौहार्दपूर्णमेलनम् सम्पन्नम्

# लोक-सभायां 'सार्वजनिक परीक्षा (अनुचित-साधन-निवारण) संशोधन-विधेयकः उपस्थापितः




हिमसंस्कृतवार्ता। लोक-सभायाम् सार्वजनिक परीक्षा (अनुचित-साधन-निवारण) संशोधन-विधेयकः उपस्थापितः। एषः विधेयकः चतुर्विंशत्यधिक-द्विसहस्रतमस्य वर्षस्य अधिनियमस्य संशोधनं कर्तुम् ईहते । एषः छात्राणां भावि-जीवनस्य संरक्षणं, परीक्षा-प्रणाल्याः पारदर्शितां, निष्पक्षतां, सत्यनिष्ठताञ्च दृढयितुम् एकां सबलां न्याय-संरचनाम् उद्भावयति।

अस्मिन् विधेयके केचन महत्वपूर्णाः नियमाः समाविष्टाः सन्ति; यत्र अपराधिनां कृते दश-वर्ष-पर्यन्तः कारागृह-दण्डः, दशकोटि-रूप्यकाणां दण्ड-शुल्कं, तथा दोषिणां सम्पत्ति-अधिग्रहणम् इत्यादयः कठोराः दण्डाः विधीयन्ते। मध्याह्न द्वादश-वादने प्रथम-स्थगनात् पश्चात् यदा सभा पुनः समवेता, तदा राज्यमन्त्री डा. जितेन्द्र सिंहः विधेयकम् उपस्थापितवान्। विधेयकस्य उपस्थापनावधौ 'नीट्' प्रकरणे छात्र-विरोध-प्रदर्शनस्य आरक्षक-कार्याचरणम् अधिकृत्य चर्चा कामयमानाः प्रतिपक्ष-सदस्याः उत्थाय उच्चैः कोलाहलं कृतवन्तः ।

## असमराज्ये अधिकांशेषु प्रभावित-क्षेत्रेषु जलस्तरः न्यूनीभूतः



हिमसंस्कृतवार्ता। असम-राज्ये जलौघ-स्थितौ परिष्कारो जातः यतः अधिकांशेषु प्रभावित-क्षेत्रेषु जलस्तरः न्यूनीभूतः। साम्प्रतं शिवसागर-गोलाघाट- जॉरहाट-चराइदेव-जनपदेषु स्थापितेषु नवाधिकशतं साहाय्य-शिबिरेषु सप्तत्रिंशत्-सहस्राधिकाः जनाः आश्रयं गृहीतवन्तः। केवलं शिवसागर-जनपदे एव षट्षष्टिः सहायता-शिबिराणि सञ्चालितानि, येषु त्रिंशत्सहस्राधिकाः जनाः वर्तमानाः। प्राशासनिक-अभिकरणानि एतेषु जनपदेषु प्रभावितेभ्यः जनेभ्यः साहाय्य सामग्रीणां वितरणं कुर्वन्ति ।

## 'आय.एस.एस.एफ.' लक्ष्यभेद-विश्वचषक स्पर्धायां भारतस्य ईशा-सिंहः स्वर्ण-पदकम् अवाप्तवती; मनु-भाकरः च कांस्य पदकं समुपार्जितवती



हिमसंस्कृतवार्ता। लक्ष्यभेद-क्रीडायाम् चीनस्य हांगझोउनगरे समायोजितायाम् आय.एस.एस.एफ. विश्वचषक-स्पर्धामालिकायां भारतस्य ईशा-सिंहः महिलानां पंचविंशति-मीटर्-पिस्तोल-स्पर्धायां स्वर्ण पदकं विजितवती । एकविंशति-वर्षीया ईशा-सिंहः अन्तिम स्पर्धायाम् उत्कृष्टं नैपुण्यं प्रदर्श्य चत्वारिंशत् लक्ष्य-वेधैः सह स्वर्ण पदकम् आत्मसात् कृतवती । अपरत्र 'पेरिस्' ओलिम्पिक्-स्पर्धायाः पदक विजेत्री मनु-भाकर प्रतिस्पर्धायाम् निर्णायकं 'शूट्-ऑफ' जित्वा अष्टाविंशति लक्ष्य-वेधैः कांस्य पदकम् अर्जितवती ।



## प्रतिपक्षीयाणां भृश-कोलाहलेन संसदसदनं स्थगितम्

हिमसंस्कृतवार्ता। नीट्-परीक्षा-प्रकरणे प्रदर्शनकारी छात्रेषु कृतस्य आरक्षक-कार्याचरणस्य विरोधं कुर्वतां विपक्षी-दलानां घोर-कोलाहलेन संसदः उभयोः सदनयोः कार्यजातं पुनः एकादशवादने यावत् बाधिम् अभवत्। सायं पञ्चवादने तृतीय-स्थगनात् परं यदा लोकसभा समवेता, तदा पीठासीन अधिकारी कृष्ण प्रसाद-तेन्नेटी देशस्य परीक्षा-प्रणाल्याम् परिष्कारार्थं सार्वजनिक-परीक्षा (अनुचित-साधन-निवारण) संशोधन विधेयकम्, इत्यस्योपरि चर्चा प्रारब्धुम् ऐच्छत्। तदा विपक्षी-सांसदाः स्व-स्थानेभ्यः उत्थाय उच्चैः विरोधोद्घोषान् अकुर्वन्, अत्रावसरे तैः नीट्-विषये प्रदर्शन-काले छात्रेषु पञ्जीकृतानां सर्वासाम् प्राथमिकीनां सद्यः एव प्रत्याहरणस्य दृढ-याचना विहिता ।

## 'एम.वी. ओमर्फी' इति वाणिज्य-पोते जाते आक्रमण-प्रकरणे एकस्य भारतीय-नागरिकस्य निधनात् पश्चात् भारत-सर्वकारेण 'यूक्रेन' देशस्य राजदूतः आहूतः



हिमसंस्कृतवार्ता। विदेश-मन्त्रालयेन भारतस्थितः युक्रेन देशस्य राजदूतः डॉ. अलेक्जेण्डर् पोलिशचुक इत्यसौ आहूतः । अयं पदक्षेपः व्यापारिक-पोते एम.वी. ओमोर्फी इत्यस्मिन् सञ्जाते आक्रमणे एकस्य भारतीय-नागरिकस्य मृत्योः पश्चात् उत्थापितः । एतां घटनामालक्ष्य स्वस्य गभीरा चिन्ता प्रकटयता विदेश मन्त्रालयेन व्यापारिक-पोतेषु एतादृशाणां आक्रमाणां घोर-निन्दा विहिता । मन्त्रालयेन रेखाङ्कितं यत् एतादृशाणि आक्रमणानि सामुद्रिक-नौवहनस्य सुरक्षायां, नौवहन-स्वतन्त्रतायाम्, अन्ताराष्ट्रिय व्यापारे च प्रतिकूलप्रभावं निपातयन्ति। विदेश मन्त्रालयेन एकस्मिन् वक्तव्ये गदितं यत्, व्यापारिक-पोतानां लक्ष्यीकरणं प्रति भारतस्य दृढ-चिन्ता युक्रेन-प्रशासनं यावत् प्रापयितुम् राजदूतः निवेदितः। मन्त्रालयेन पुनः प्रत्यपादयत् यत् एतादृशानि कार्याणि निरपराधानां नागरिक-नाविकानां जीवनं सङ्कटे निपातयन्ति।

# सुभाषितम्

**कामं कामयमानस्य,**
**यदा कामः समृध्यते।**
**अथैनमपरः कामः,**
**तृष्णा विध्यति बाणवत्।।**
**(महाभारत, अनु. पर्व- ९३/४३)**

अर्थात्- कामना करने वाले मनुष्य की एक कामना जब पूर्ण होती है, तो दूसरी कामना उपस्थित हो जाती है। यह तृष्णा बाण के समान तीक्ष्ण प्रहार करती है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## गतदिवसे पूर्व-राष्ट्रपतेः, डॉ. ए. पी.जे. अब्दुलकलाम वर्यस्य पुण्यतिथिः आसीत्




हिमसंस्कृतवार्ता। गतदिवसे पूर्व-राष्ट्रपतेः, प्रसिद्ध-वैज्ञानिकस्य, भारतरत्न-विभूषितस्य डॉ. ए. पी.जे.अब्दुल-कलामवर्यस्य पुण्यतिथिः आसीत् । लोकप्रियः मिसाइल् मैन इति नाम्ना प्रख्यातः डॉ. कलामवर्यः देशस्य अग्रगण्येषु शिक्षकेषु अन्यतमत्वेन स्मर्यते । सः प्रतिष्ठित नागरिक सम्मानैः पद्मभूषणम्, पद्मविभूषणम् अथ च देशस्य सर्वोत्कृष्टं नागरिक सम्मानं भारतरत्नम् इत्यादिभिः विभूषितम् । सः भारतस्य रक्षा-संशोधन-क्षेत्रे अन्तरिक्ष अनुसन्धान-विकास-कार्येषु च अत्यन्तं महत्वपूर्णा भूमिकां निर्व्यढवान्।

# हिमाचलप्रदेशविश्वविद्यालयः (HPU): १८६ नियुक्तीनां परीक्षा प्रारब्धा, पूर्वकुलपतीनां भूमिकाऽपि अन्वेषणाधीना




हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशविश्वविद्यालये २०१४ तः कृतानां १८६ नियुक्तीनां परीक्षा प्रारब्धा अस्ति। भारतस्य नियन्त्रक- महालेखापरीक्षकस्य प्रतिवेदने प्रवेशप्रक्रियायाः विषये गम्भीराः प्रश्नाः उत्थापिताः, तदनन्तरं विश्वविद्यालयप्रशासनेन एका अनुसन्धायिका समितिः गठिता। कुलपतिः प्रो. महावीरसिंहः उक्तवान् यत् येषां पूर्वकुलपतीनां कार्यकालियोः एताः नियुक्तयः अभवन्, तेषाम् अपि भूमिका अनुसन्धानस्य परिधौ भविष्यति। अनुसन्धानप्रतिवेदनम् कार्यकारीपरिषदः समक्षम् उपस्थापयिष्यते। आवश्यकतायाम् सत्याम् सम्बद्धान् पूर्वकुलपतीन् अपि कार्यकारीपरिषदः उपवेशने आहूय तेषां पक्षः श्रोष्यते, उत्तरदायित्वं च निर्धारयिष्यते। कैग-इत्यस्य अनुपालन-लेखापरीक्षा-प्रतिवेदने १८६ नियुक्तिषु गम्भीराणां अनियमिततानां सङ्केतः कृतः अस्ति। प्रतिवेदनस्यानुसारम् एतासु नियुक्तिषु अभ्यर्थिनां प्रमाणपत्राणां सत्यापनं सम्बद्धेभ्यः निर्गमित-संस्थाभ्यः न कारितम्। एतदतिरिच्य एकस्य अयोग्यस्य सहायकप्राध्यापकस्य तथा एकस्य अतिथि-संकायसदस्यस्य नियुक्तिः विश्वविद्यालय- अनुदान- आयोगस्य नियमानाम् प्रतिकूला प्राप्ता।

कुलपतिः प्रतिपादितवान् यत् समितिः तथ्यानाम् अभिलेखानां च निष्पक्षं परीक्षणं करोति। परीक्षायां पूर्णतायां सत्यां प्रतिवेदनम् कार्यकारीपरिषदः समक्षं स्थापयिष्यते, यत्र परिषदः अग्रिमकार्याचारे निर्णयं करिष्यति। सः अवदत् यत् यदि अनुसन्धाने कस्मिंश्चिद् अपि स्तरे अनियमितता दृश्यते, तर्हि विश्वविद्यालयः नियमानुसारं कार्यवाहं करिष्यति।

समितिः नियुक्तिषु अङ्गीकृतां चयनप्रक्रियां, परीक्षार्थीनां योग्यतां, प्रपत्राणां सत्यापनम्, आरक्षणनियमानां पालनं, चयनसमितीनां कार्यवाहीं च परीक्षते। समितिः एतदपि पश्यन्ती अस्ति यत् भर्तीप्रक्रिया विश्वविद्यालय- अधिनियमस्य, यूजीसी-विनियमस्य, अन्येषां च निर्धारित-नियमानाम् अनुरूपं कृता आसीत् वा न वा।

## प्रतिवेदनस्य अन्ये मुख्यांशाः-

कैग-प्रतिवेदने नियुक्ति-अनियमिततानाम् अतिरिच्य विश्वविद्यालये २७ तः ३७ प्रतिशतं यावत् अध्यापकानां पदानां रिक्तिः, शोधगतिविधौ शिथिलता, उद्योगैः सह सीमिताः सक्रियाः सम्झौताः, शिक्षणसंरचनायां त्रुटयः अपि ध्यानाकर्षिताः सन्ति।

## नवदेहल्यां द्वाविंशतितमायाः राष्ट्रमण्डल-टेबल-टेनिस-प्रतिस्पर्धायाः विधिवत् शुभारम्भो जातः




हिमसंस्कृतवार्ता। नवदेहल्यां द्वाविंशतितमायाः राष्ट्रमण्डल-टेबल-टेनिस-प्रतिस्पर्धायाः विधिवत् शुभारम्भो जातः। स्पर्धायाः उद्घाटन समारोहे सम्बोधयन्ती दिल्ल्याः मुख्यमन्त्री रेखा-गुप्ता प्रावोचत् यदेषा राष्ट्रमण्डल-टेबल-टेनिस प्रतियोगिता सर्वेषां कृते प्रेरणास्रोतः वर्तते, इयं सहभागी-देशानां मध्ये परस्पर-सम्बन्धान् सुदृढीकर्तुं सहायिका भविष्यति। सा अवोचत् यत्, क्रीडासु जनानां एकत्रीकरणे परस्पर-सद्भावस्य संवर्धने काचित् अपरिमिता शक्तिः भवति। मुख्यमन्त्री स्पष्टीकृतवती यत् दिल्ली-नगरं अन्ताराष्ट्रीय-क्रीडा-आयोजनानां आतिथ्याय पूर्णतः सज्जमस्ति, सर्वकारः च राष्ट्रिय-राजधान्यां क्रीडा-मूलसंरचनायाः सुदृढीकरणाय क्रीडा-सौविध्यानां परिष्काराय च निरन्तरं कार्यं करोति।

## ऋतु-विभागेन ओडिशा-छत्तीसगढ-पश्चिमवङ्ग-राज्येषु अति-वृष्टिपरा पूर्वसूचना प्रख्यापिता



हिमसंस्कृतवार्ता। भारतीय-ऋतु-विज्ञान-विभागः पूर्वमनुमिमीते यत् वङ्गोपसागरे गभीर-निम्न-पीडस्य सञ्जातत्वात् ओडिशा-छत्तीसगढ-गङ्गा-तटीय-पश्चिमवङ्ग-राज्येषु अति-वृष्टिः भविता। विभागेनानेन ओडिशा-राज्ये क्वचित् अत्यन्त-वर्षणस्य सम्भावनाम् आलोच्य रक्त-वर्णीया-संचेतना प्रसारिता । एतदतिरिच्य, ऋतुसंस्था दिल्ली-चण्डीगढ-हरियाणा-हिमाचलप्रदेश-पञ्जाब-उत्तरप्रदेश-उत्तराखण्ड-विदर्भ-क्षेत्रेषु अपि श्वः यावत् अतिवृष्टिं वेदयति। इतोऽपि च विभागः धीवरान् उद्बोधयति यत् ते बुधवासरं यावत् उत्तर-पश्चिम-वङ्गोपसागरे तथा ओडिशा-पश्चिमवङ्ग-उत्तर-आन्ध्रप्रदेशयोः तटीय क्षेत्रेषु समुद्रं मा विविशुः ।

# भाजपा-कार्यकालस्य प्रश्नपत्र-प्रकटनस्य, नियुक्ति-घोटालानां च उपरि आनेष्यामः श्वेतपत्रम्, मन्त्रिमण्डले गमिष्यति



हिमसंस्कृतवार्ताः- धर्मशाला। मुख्यमन्त्रिणा सुखविन्द्रसिंहसुक्खुना पूर्वतन- भाजपा- सर्वकारस्य काले सम्मुखीभूतानां प्रश्नपत्र-प्रकटन, नियुक्ति- अनियमितता-कथित- भ्रष्टाचार- प्रकरणानाम् उपरि श्वेतपत्रम् आनेतुम् उद्घोषितम्। सोमवासरे धर्मशालायां तेन उक्तं यत् एतेषां प्रकरणानाम् अन्वेषणाय एका विशेषसमितिः निर्मीयते, या तथ्यानां संकलनं कृत्वा विस्तृतम् 'आरोपपत्रम्' उत्तरदायिजनानां भूमिकां निश्लेष्यति। एषः प्रस्तावः शीघ्रमेव राज्यमन्त्रिमण्डलस्य उपवेशने स्वीकृतये स्थापयिष्यते। मुख्यमन्त्रिणा माध्यमैः (मीडिया) सह सम्भाषणकाले, एक्स इति सामाजिकमाध्यमे च प्रसारितवक्तव्ये प्रोक्तं यत् 'आरोपपत्रं' केवलं सर्वकारीयाभिलेखं न भविष्यति, अपि तु जनानां सम्मुखमपि स्थापयिष्यते, येन जनाः नियुक्तिप्रक्रियासु जातानां अनियमिततानां तथा च तासां कृते उत्तरदायिजनानां सूचनां प्राप्तुं शक्नुयुः।

## मम कार्यकाले प्रश्नपत्र-प्रकटनस्य एकापि घटना न- मुख्यमंत्री

सर्वकारस्य उद्देश्यं राजनैतिक-आरोप-प्रत्यारोपाः न, अपि तु यूनां भविष्यस्य सुरक्षां तथा नियुक्तिप्रक्रियायां पारदर्शितां सुनिश्चितं कर्तुमस्ति। विगतेषु वर्षेषु जाताभिः प्रश्नपत्र-प्रकटन-घटनाभिः सर्वतोऽधिका हानिः तेभ्यः छात्रेभ्यः अभ्यर्थिभ्यः च अभवत्, ये परीक्षाणां सज्जनाय कठोरं परिश्रमं कृतवन्तः आसन्। मुख्यमन्त्रिणा विश्वासः कृतः यत् तस्य सार्धत्रयवर्षाणां कार्यकाले प्रश्नपत्र-प्रकटनस्य एकापि घटना सम्मुखं नागता। २०१७ तः २०२२ वर्षस्य मध्ये भाजपा-सर्वकारस्य समये आरक्षक- नियुक्ति- परीक्षया सह तत्कालीन- हिमाचलप्रदेश-कर्मचारि- चयन- आयोगे प्रश्नपत्र- प्रकटनस्य गम्भीरप्रकरणाणि सम्मुखीभूतानि आसन्। तेन भाजपा-दले तथा केन्द्रीयमन्त्रिणि जे. पी. नड्डा वर्ये अपि प्रतिप्रहारं कुर्वन् उक्तं यत् यासां घटनानाम् उल्लेखं भाजपा अद्य करोति, ताः तस्य स्वकीयशासनकालस्य एव सन्ति। हिमाचल-भाजपा-नेतारः केन्द्रीयनेतृत्वं प्रति मिथ्यासूचनाः ददति।

## ये जनाः विक्रेतुम् इच्छन्ति, तेषां गमनाय पूर्णस्वतन्त्रता

सर्वकारस्य स्थिरतायाः उपरि उत्थितान् प्रश्नान् निराकुर्वन् मुख्यमन्त्रिणा उक्तं यत् सर्वकारः पूर्णतया सुदृढः अस्ति, तस्मै च जनानां समर्थनं प्राप्तमस्ति। तस्य सर्वकारः क्रय-विक्रय-राजनीत्यां विश्वासं न करोति। ये जनाः विक्रेतुम् इच्छन्ति, तेषां गमनाय पूर्णस्वतन्त्रता वर्तते। मुख्यमन्त्रिणा इदमपि प्रकटीकृतः यत् भाजपा-दलस्य केचन नेतारः काङ्ग्रेसदलस्य सम्पर्के सन्ति, किन्तु भ्रष्टाचारस्य आरोपैः परिवृताः जनाः दले न सम्मिलिताः करिष्यन्ते। प्रदेशस्य जनाः अधुना परम्पराणाम् स्थाने सर्वकारस्य प्रदर्शनस्य आधारेण निर्णयं करिष्यन्ति।

# भाजपादलस्य राज्यसभा-सांसदेन हर्षमहाजनेन सह गृहमन्त्रिणः अमितशाहस्य शिष्टाचारमेलनम्



**हिमसंस्कृतवार्ताः- नवदेहली।** भारतीयजनतापार्टीति-दलस्य राज्यसभा-सांसदेन हर्षमहाजनेन संसदभवने स्थिते केन्द्रीय- गृहमन्त्रिणः अमितशाहस्य कार्यालये तेन सह शिष्टाचारमेलनं कृतम्। अस्मिन् अवसरे हिमाचलप्रदेशस्य वर्तमान- राजनैतिक- आर्थिक- प्रशासनिक- स्थितीनाम् उपरि विस्तरेण चर्चा अभवत्।

हर्षमहाजनेन उक्तं यत् प्रदेशे काङ्ग्रेस-सर्वकारस्य सङ्घटनानन्तरं वित्तीय-अनुशासनं पूर्णतया समाप्तं जातम्। सर्वकारेण काञ्चिदपि दूरदृष्टिं विना प्रदेशः भारिकस्य ऋणस्य भारे प्रक्षिप्तः। तेन प्रोक्तं यत् काङ्ग्रेस-सर्वकारः अद्यावधि १.१० लक्षकोटि रूप्यकेभ्यः अधिकम् ऋणं गृहीतवान्, किन्तु तथापि प्रदेशे विकासकार्याणि पूर्णतया स्थगितानि सन्ति।

## आपदाप्रबन्धने काङ्ग्रेस- सर्वकारः पूर्णतया असफलः

हर्षमहाजनेन कथितं यत् हिमाचलप्रदेशे आपदाप्रबन्धनस्य विषये अपि काङ्ग्रेस-सर्वकारः पूर्णतया असफलः सिद्धः अभवत्। सर्वकारस्य पार्श्वे न काऽपि पूर्वसज्जता अस्ति न च काऽपि दृढ़- कार्ययोजना। प्रति-आपदः अनन्तरं काङ्ग्रेससर्वकारः केवलं केन्द्रीयसर्वकारस्य उपरि दोषारोपणं कृत्वा स्वकीयाः विफलताः निगोपयितुं प्रयास करोति। तेन उक्तं यत् केन्द्रीयसर्वकारेण समये-समये हिमाचलप्रदेशाय औदार्येण आर्थिकी साहाय्यता उपलब्धा कारिता, किन्तु प्रदेशसर्वकारः तस्याः राशेः अपि प्रभावशालिनं पारदर्शिनं च उपयोगं कर्तुम् असफलः अभवत्। आश्रयवितरणे भेदभावः क्रियमाणः अस्ति।

## ई-टैक्सी-सेवा हेतु आयुसीमा संवर्ध्य ५० वर्षाणि कृता, आवेदनस्य अन्तिमतिथिः अपि १ मासम् यावत् वर्धिता



**हिमसंस्कृतवार्ताः- शिमला।** राज्यसर्वकारेण 'राजीव गांधी स्वरोजगार स्टार्टअप योजना-२०२३' इत्यस्याः अन्तर्गतं ई-वाहन/ ई-टैक्सी योजनायाः लाभं प्राप्तुम् इच्छद्भ्यः अभ्यर्थिभ्यः (आवेदकेभ्यः) महदाश्रयः प्रदत्तः। सर्वकारेण योजनायाः अन्तर्गतं आयुसीमायाः पात्रतायां शिथिलतां प्रदाय इयं २३ तः ४५ वर्षेभ्यः संवर्ध्य २३ तः ५० वर्षाणि कृता। एतेन सहैव योजनायाः अन्तर्गतं आवेदनपत्रस्वीकरणस्य अन्तिमतिथिः अपि एकमासं यावत् वर्धिता। श्रम- रोजगार- विदेशनियोजन- विभागस्य (ओवरसीज प्लेसमेंट) सचिवया प्रियंका-बासु-इंग्ती-वर्यायाः पक्षतः अस्मिन् विषये अधिसूचना प्रसारिता अस्ति।

जनहिताय कृतानि एतानि संशोधनानि सद्यः प्रभावेन प्रवर्तिताः मंस्यन्ते। ई-टैक्सी- दिशा- निर्देशानां धारा ५(बी) मध्ये संशोधनं कृत्वा अधुना २३ तः ५० वर्षाणां जनाः अस्य पात्राः भविष्यन्ति। विज्ञापनस्य माध्यमेन आवेदनपत्रसमर्पणस्य अन्तिमतिथिः एकमासं यावत् पुनः वर्धिता। सर्वकारस्य अस्य निर्णयेन प्रदेशस्य तादृशानां बहूनां जनानां स्वरोजगारेण सह सम्बद्धतायाः अवसरः प्राप्स्यते, ये पूर्वम् आयुसीमायाः कारणेन आवेदनं कर्तुं न शक्नुवन्ति स्म।

# बिहारवार्ता- प्रशान्तकिशोरस्य प्रत्यादेशवचनात् परं निर्वाचनकार्यात् मुक्ताः भविष्यन्ति जीविकाभगिन्यः आङ्गनवाडीसेविकाश्च



पटना। बांकीपुर-विधानसभा-उपनिर्वाचने जीविकाभगिनीनाम् आङ्गनवाडीसेविकानां च निर्वाचनप्रक्रियायां सम्भावितनियुक्तिं गृहीत्वा उत्पन्नस्य विवादस्य मध्ये मुख्य-निर्वाचन-अधिकारिणा स्पष्टीकृतम् यत् कस्यापि गैर-सरकारी अथवा अर्ध-सरकारी-कर्मचारिणः प्रत्यक्षेण अप्रत्यक्षेण वा निर्वाचनकार्ये नियुक्तिः न भविष्यति। जनसुराज-दलम् एतत् स्वमाङ्गस्य विजयम् अकथयत्।जनसुराज-दलस्य प्रदेशाध्यक्षः मनोजभारती उक्तवान् यत् दलस्य प्रतिनिधिमण्डलेन मुख्य-निर्वाचन-अधिकारिणा सह मिलित्वा जीविकाभगिनीनाम् आङ्गनवाडीसेविकानां च निर्वाचनप्रक्रियायां सहभागितां प्रति आपत्तिः दर्शिता आसीत्। सः अकथयत् यत् मुख्य-निर्वाचन-अधिकारिणा आश्वासनं दत्तं यत् एतादृशस्य कस्यापि कर्मचारिणः उपनिर्वाचने नियुक्तिः न भविष्यति तथा च अस्मिन् विषये मण्डलप्रशासनाय (जिलाप्रशासनाय) आवश्यकाः निर्देशाः दत्ताः सन्ति। मनोजभारती एतदपि आरोपम् अकरोत् यत् उपनिर्वाचनक्षेत्रे महत्यां संख्यायां सांसदाः, विधायकाः, पूर्वविधायकाः अन्ये च राजनैतिक-पदाधिकारिणः शासकीयसुरक्षया संसाधनैः च सह सक्रियाः सन्ति, यत् आदर्श-आचारसंहितायाः भावनायाः प्रतिकूलम् अस्ति। सः निर्वाचनआयोगात् अस्मिन् प्रकरणे अपि ध्यानं दातुं याचितवान्। अपरञ्च, जनसुराज-दलस्य राष्ट्रियवक्ता कुमारसौरभः अकथयत् यत् दलस्य प्रत्याशी प्रशांतकिशोरः रविवासरे पत्रकारपरिषदि एतं विषयं प्रमुखतया उत्थापितवान् आसीत् तथा च २४ घण्टाभ्यन्तरैः कार्यवाही न भवेत् चेत् निर्वाचनआयोगस्य समक्षं धरना-प्रदर्शनस्य प्रत्यादेशं दत्तवान् आसीत्। तदनन्तरं दलस्य प्रतिनिधिमण्डलेन निर्वाचनपर्यवेक्षकाय मुख्य-निर्वाचन-अधिकारिणे च ज्ञापनं समर्पितम्। कुमारसौरभस्य अनुसारम्, मुख्य-निर्वाचन-अधिकारिणा आश्वासितं यत् बांकीपुर-उपनिर्वाचने कस्यापि गैर-सरकारी अथवा अर्ध-सरकारी-कर्मचारिणः निर्वाचनप्रक्रियायां नियुक्तिः न करिष्यते। एतस्मात् परं जनसुराज-दलेन निर्वाचनआयोगं प्रति कार्तज्ञ्यं (आभारं) प्रकटितम् एतत् च निष्पक्ष-निर्वाचनस्य दिशि सकारात्मकं कदमम् (चरणम्) इति अभिहितम्।

# बांकीपुर-क्षेत्रे भाजपा-दलस्य विशालं शक्तिप्रदर्शनम्, नितिननवीन-सम्राटचौधरिणोः मार्गयात्रायां जनसमुद्रः सम्मर्दितः



पटना। बांकीपुर-विधानसभा-उपनिर्वाचनस्य प्रचारअभियानस्य अन्तिमचरणे सोमवासरे भारतीयजनतापार्टी-दलेन राजधानी-पटना-नगरे भव्यां मार्गयात्राम् (रोड शो) निष्कास्य शक्तिप्रदर्शनं कृतम्। भाजपा-दलस्य राष्ट्रीयाध्यक्षः नितिननवीनः मुख्यमन्त्री सम्राटचौधरी च एनडीए-दलस्य प्रत्याशी-नीरजसिंहस्य समर्थने जनसम्पर्कं कृत्वा मतदातृभ्यः मतदानस्य प्रार्थनाम् अकुरुताम्। मार्गयात्रायां महत्यां संख्यायां कार्यकर्तारः समर्थकाश्च उपस्थिताः आसन्। भाजपा-दलस्य इयं मार्गयात्रा भट्टाचार्य-मार्गात् आरभ्य कदमकुआं-मार्गेण गत्वा गान्धी-मैदान-स्थलं प्राप्नोत्। पूर्णे मार्गे भाजपा-दलस्य ध्वजैः पटैश्च अलंकृतेषु मार्गेषु कार्यकर्तारः नेतॄणां स्वागतम् अकुर्वन् उत्साहेन च मार्गयात्रायां भागम् अगृह्णन्।

मुख्यमन्त्री सम्राटचौधरी भाजपा-दलस्य राष्ट्रीयाध्यक्षः नितिननवीनः च अनावृते वाहने (Open Vehicle) उपविश्य जनानाम् अभिवादनम् अकुरुताम्। अस्मिन् अवसरे भाजपा-दलस्य प्रदेशाध्यक्षः सञ्जयसरावगी, मन्त्री सरवणकुमारः, पथनिर्माणमन्त्री इन्जिनियर-शैलेन्द्रः, लोजपा (रामविलास)-दलस्य प्रदेशाध्यक्षः राजूतिवारी च सह एनडीए-दलस्य अनेके वरिष्ठाः नेतारः उपस्थिताः आसन्।पथनिर्माणमन्त्रिणा इन्जिनियर-शैलेंद्रेण दावः कृतः यत् मार्गयात्रायाम् एकत्रिता जनसमूहः (जनसमुद्रः) अस्य विषयस्य सङ्केतः अस्ति यत् बांकीपुरस्य जनता एनडीए-दलेन सह अस्ति तथा च भाजपा-प्रत्याशी नीरजसिंहः बृहता अन्तरेण विजयं प्राप्स्यति। सः जनसुराज-दलस्य संस्थापकात् प्रशान्तकिशोरात् राजद-नेतुः तेजस्वीयादवात् च उपरि अपि राजनैतिकीं टिप्पणीं कृतवान्। बांकीपुर-विधानसभा-आसने ३० जुलाई-दिनाङ्के मतदानं भविष्यति। निर्वाचनप्रचारः २८ जुलाई-दिनाङ्कस्य सायं स्थगिष्यते। तदनन्तरं ३ अगस्त-दिनाङ्के मतगणना भविष्यति तस्मिन्नेव दिने परिणामः अपि घोषितः भविष्यति।

उल्लेखनीयम् अस्ति यत् भाजपा-दलस्य वरिष्ठनेतुः नितिननवीनस्य विधानसभासदस्यपदात् त्यागपत्रदानानन्तरं एतत् आसनं रिक्तम् अभवत्। अनेनैव कारणेन अत्र उपनिर्वाचनं आयोज्यते। राजनैतिकरूपेण प्रतिष्ठायाः एतस्मिन् आसने सम्पूर्णस्य बिहारराज्यस्य दृष्टिः निहिता अस्ति।

# मिथिला-कला-मञ्चेन आभासीयः श्रावण-महोत्सवः 'सावनक स्नेह मिथिलाक नेह' सफलतया आयोजितः




## - "बरखा के बुन-बुन जहर माहुर सन सखी की कहब दुख साओन मास.." इति गीतेन सर्वे मन्त्रमुग्धाः

बोकारो। अन्तरराष्ट्रीय-मैथिली-परिषदः इकाई मिथिला-कला-मञ्चेन श्रावणऋतोरागमनस्य उपलक्ष्ये शुक्रवासरे सायंकाले आभासीयः 'सावनक स्नेह मिथिलाक नेह' इति श्रावण-महोत्सवः समायोजितः। अस्मिन् कार्यक्रमे झारखण्ड-बिहार-बङ्गाल-दिल्ली-उत्तरप्रदेश-हरियाणा-राज्येभ्यः तथा नेपालदेशात् आगतैः कविभिः कलाकारैश्च कविता-गीतादीनां मनोहराः प्रस्तुतयः प्रदत्ताः। सम्पूर्णे कार्यक्रमे मैथिली-लोकसङ्गीतस्य, भक्तेः, हास्यस्य सांस्कृतिकाभिव्यक्तीनां च सुन्दरः समन्वयः दृष्टः। भारतस्य विभिन्नराज्येभ्यः नेपालदेशाच्च सम्बद्धानां कलाकाराणां सक्रियसहभागितया अयं कार्यक्रमः अन्तरराष्ट्रीयस्वरूपं प्राप्तवान्। जमशेदपुरस्थितस्य लालबहादुरशास्त्री-महाविद्यालयस्य प्राचार्यः वरिष्ठसाहित्यकारश्च अशोक अविचलः अध्यक्षतां कृतवान्। आसनसोलनिवासिनी पूनम झा कार्यक्रमस्य सफलं सञ्चालनम् अकरोत्। कार्यक्रमस्य शुभारम्भः भगवती-वन्दनया अभवत्। वाराणसीतः गीतकारः गायकश्च अशोक मिश्रः 'बदरा जुनि बरसे दिन रतिया..' इति गीतं प्रस्तुतवान्। दिल्लीतः लक्ष्मणकुमार झा गीतं गायितवान्। प्रतिभा झा 'यौ बदरा जुनि बरसे..' इति गीतं प्रस्तुतवती। जमशेदपुरतः गोपालचन्द्र झा कजरीगीतं सस्वरं प्रस्तुतवान्। नूतनजी 'झूला झुलबथि राधाजी..' इति गीतं गायितवती। दरभङ्गातः वाचस्पति ठाकुर सुजीतः 'सावन राति अन्हरिया..' इति हास्यकवितां पठितवान्। बोकारोनगरात् कविः गायकश्च मिथिला-कला-मञ्चस्य माध्यम-प्रभारी अरुण पाठकः 'बरखा के बुन-बुन जहर माहुर सन सखी की कहब दुख साओन मास..' इति गीतं सुमधुररूपेण प्रस्तुतवान्। धनबादतः आशा मिश्रा 'जमुना किनारे कदम केर गछिया..', दुर्गापुरतः जयराम झा 'आयल छी मंदिर एक आस लगा क..', नेपालस्य भैरवात् सोनू ठाकुरः 'बदरा उमरि-झुमरि झम बरसे..', नोएडातः पुष्पा पाठक 'सावन लटकल रेशम झूला..' इति गीतानि प्रस्तुतवन्तः। आसनसोलतः पूनम झा राग-कामोदे 'घिरि-घिरि आयल घनकारी..' इति मधुरप्रस्तुत्या सर्वान् मन्त्रमुग्धान् अकरोत्। सोनीपत-हरियाणातः विनीता ठाकुर, अहमदाबादतः रंजू मिश्रा, धनबादतः निशा झा, घोघरडीहातः डॉ. रतनकुमारी अपि स्वकीयाः उत्कृष्टाः प्रस्तुतयः अददुः। कार्यक्रमाध्यक्षः अशोक अविचलः 'मूल नक्षत्र मय जनमल नेना-तुलसीदास..' इति कवितां श्रावयित्वा सर्वेषां प्रशंसां प्राप्तवान्। अन्तरराष्ट्रीय-मैथिली-परिषदः संस्थापकः डॉ. धनाकर ठाकुरः सर्वेभ्यः प्रतिभागिभ्यः शुभाशंसाः प्रदाय अवदत् यत् एतेषां सांस्कृतिककार्यक्रमाणां माध्यमेन मैथिली-भाषा-साहित्य-संस्कृतेः संरक्षणं संवर्धनं च सुदृढं भवति। उपस्थितैः श्रोतृभिः सर्वेषां कलाकाराणां मुक्तकण्ठेन प्रशंसा कृता तथा एतादृशाः आयोजनाः मैथिलीभाषायाh संस्कृतेश्च संरक्षणाय अत्यन्तं हितकराः इति अभिप्रायः व्यक्तः। अन्ते पटना-पुस्तक-मेलायाः संस्थापकः एन. के. झा सर्वेभ्यः कलाकारेभ्यः श्रोतृभ्यः आयोजकेभ्यश्च धन्यवादं ज्ञापितवान्।

# अवशिष्टवेतन-निवृत्तिवेतन-शोधनाय द्विदिवसीयः विशेषशिविरः आरब्धः संस्कृतविश्वविद्यालयस्य दरबार-मण्डपे दत्तानि प्रायः ११५ आवेदनानि



**हिमसंस्कृतवार्ता, विश्व मोहन झा, दरभंगा।** ये सेवारताः सेवानिवृत्ताः च कर्मचारिणः अवशिष्टवेतनं (बकाया वेतन) वा सेवांतलाभस्य (निवृत्तिवेतनादेः) राशिं न प्राप्तवन्तः, तेषां कृते संस्कृतविश्वविद्यालयस्य दरबार-मण्डपे द्विदिवसीयस्य विशेषशिविरस्य शुभारम्भः कृतः। सोमवासरे प्रथमे दिने शोधनाय (भुगतानाय) प्रायः ११५ आवेदनानि समर्पितानि। शिविरः द्वितीये दिने मङ्गलवासरे अपि भविष्यति। आवेदकाः अत्र आवश्यकैः पत्रैः (प्रमाणपत्रैः) सह स्व-शोधन-सम्बन्धि आवेदनं दातुम् अर्हन्ति।

एतां सूचनां ददन् जनसम्पर्काधिकारी (पीआरओ) डॉ. निशिकान्तः अवदत् यत् कुलपतिः प्रो. लक्ष्मीनिवासपाण्डेयः स्वयं बहुकालं यावत् शिविरे उपविश्य आवेदकानां क्लेशं श्रुतवान्, विधिसम्मतकार्याचरणस्य (कार्रवाई) विषये च आश्वासनं दत्तवान्। कुलपतिः लेखाविभागस्य कर्मचारिणः अकथयत् यत् सर्वाणि आवेदनानि गम्भीरतया ग्रहीतव्यानि, आवेदकानां कापि असुविधा न भवेत् इत्यस्यापि ध्यानं रक्षणीयम्। सः आवेदकान् धैर्यं धर्तुं प्रार्थितवान्।

अपरञ्च, सम्पूर्णं दिनं शिविरे उपविष्टः कुलसचिवः डॉ. दिनेशझा अवदत् यत् सर्वेषु आवेदनेषु कृतानां शोधनसम्बन्धि-दावानां परीक्षणं करिष्यते। सर्वकारस्य राजभवनस्य (लोकभवनस्य) च दिशानिर्देशानां पालनं कुर्वद्भिः आवेदनानां पृथक्करणं (छंटनी) करिष्यते, तदनन्तरं च शोधनं भविष्यति।अस्मिन्नेवान्तरे वित्तपदाधिकारी (एफओ) डॉ. पवनकुमारझा अवदत् यत् विश्वविद्यालयस्य शिक्षकाणां शिक्षकेतर-कर्मचारिणां च वेतन-अवशिष्टवेतनयोः तथा सेवानिवृत्त-शिक्षकाणां कर्मचारिणां च सेवांतलाभ-सम्बन्धीनि आवेदनानि प्राप्तानि सन्ति। शिबिरात् परं सर्वेषां विधिसम्मता आर्थिकगणना करिष्यते, ततश्च शोधनकार्यम् अग्रे वर्धिष्यते। उल्लेखनीयमस्ति यत् पटना-स्थित-राजभवनस्य (लोकभवनस्य) निर्देशेन आयोजितं विशेषशिविरमधिकृत्य अद्य विश्वविद्यालय-परिसरे महती व्यग्रता (गहमागहमी) आसीत्। शोधनस्य विषये आवेदकाः अपि अतीव आशावन्तः दृश्यन्ते स्म। शिविरे अंकेक्षकः सह-अनुभागाधिकारी (एसओ) अभिषेककुमारझा, लेखासहायकौ रणजीतठाकुरः शम्भूनाथझा च, लेखाकर्मी राजनकुमारझा च विशेषरूपेण सहभागिनः अभवन्, आवेदनानां संयोजने च सर्वैः महती भूमिका निर्व्यूढा।

# डीएवी पब्लिक स्कूल स्वांग विद्यालये क्रीडा डीएवी एथलीट 2026 इत्यस्य भव्यायोजनम्



**हिमसंस्कृतवार्ताः-** डीएवी पब्लिक स्कूल स्वांग विद्यालयस्य क्रीडा प्रांगणे डीएवी एथलीट 2026 इत्यस्य भव्यायोजनं कृतम्। अस्मिन् अवसरे डीएवी विद्यालयस्य सप्त विद्यालयाः भागं गृहीतवन्तः। समारोहस्य आरम्भः वैदिक परम्परानुसारं मन्त्रोच्चारेण शंखध्वनिना च अभवत्। मुख्यातिथि महोदयेनोक्तं यत् अस्माकं जीवने क्रीडायाः विशेषं स्थानम् अस्ति। अनया छात्राणां वैयक्तिक, सामाजिक, शारीरिक उन्नतयः वर्धन्ते। प्राचार्यमहोदयेन अनुजकुमारमिश्र महाभागेन सर्वेषां गणमान्यजनानाम् हृदयेन अभिनन्दनं कृतं कथितं यत् क्रीडा मानवजीवनस्य अभिन्नम् अङ्गम् अस्ति। अस्मिन् शुभ अवसरे सर्वे शिक्षकाः, छात्राः अभिभावकाश्चोपस्थिताः आसन्।

# क्षेत्रीयसङ्घटनमन्त्रिणा सह संस्कृतभारतीदेहरादूनस्य कार्यकर्तॄणां सौहार्दपूर्णमेलनम् सम्पन्नम्




**देहरादूनम्, २६ जुलाईमासः।** उत्तराञ्चल उत्थानपरिषदः सेवानिकेतने डॉ नित्यानन्दसभागारे संस्कृतभारत्याः देहरादूनकार्यकर्तॄणां क्षेत्रीयसङ्घटनमन्त्रिणा देवेन्द्रपण्ड्यावर्येण सह सौहार्दपूर्णमेलनं सङ्घटनात्मक-मुपवेशनं च सम्पन्नम्। अस्मिन् उपवेशने सङ्घटनविस्तारः, कार्यकर्तृनिर्माणं, संस्कृतसप्ताहस्य योजनारचना तथा आगामिकार्यक्रमाणां विस्तृतरूपरेखाविषये गम्भीरविमर्शः अभवत्।उपवेशने क्षेत्रीयसङ्घटनमन्त्री देवेन्द्रपण्ड्याः अवदत् यत् संस्कृतभारत्याः कार्यं केवलं संस्कृतभाषाप्रचारपर्यन्तं नास्ति, अपितु भारतीयज्ञानपरम्परायाः समाजस्य सर्वेषु स्तरेषु प्रसारणमपि अस्याः प्रमुखम् उद्देश्यमस्ति। तदर्थं नियमितसम्पर्कः, सततसंवादः, योजनाबद्धसङ्घटननिर्माणं च अत्यावश्यकम्। तेन महानगरजनपदयोः दायित्वानां स्पष्टनिर्धारणेन कार्यस्य अधिकप्रभावकारितायै विशेषेण बलं प्रदत्तम्। अवसरे अस्मिन् देहरादूनमहानगरस्य जनपदस्य च सङ्घटनात्मकसंरचनायाः समीक्षा कृता।

प्रान्ते कुटुम्बशिक्षणप्रमुखत्वेन नागेन्द्रव्यासो, श्लोकशिक्षणप्रमुखत्वेन डॉ नवीनजसोला, विभागे संयोजकत्वेन डॉ प्रदीप सेमवालो जनपदाध्यक्षत्वेन डॉ रामभूषणबिजल्वाणः, जनपदमन्त्रित्वेन माधवपौडेलः, जनपदसम्पर्कप्रमुखत्वेन धीरजमैठाणी महानगरमन्त्रित्वेन नीतीशमैठाणी,च स्वस्वदायित्वेषु उल्लिखिताः। जनपदस्य तहसीलविकासखण्डग्रामस्तरेषु सङ्घटनस्य सुदृढीकरणाय योजनाः प्रस्तूताः।उपवेशने निर्णयः कृतः यत् नियमितसाप्ताहिकमेलनैः, अभ्यासवर्गैः, कार्यशालाभिः च कार्यकर्तॄणां प्रशिक्षणं सुदृढीभविष्यति। विश्वविद्यालयेषु, महाविद्यालयेषु, शिक्षणसंस्थासु, सामाजिकसंस्थासु च कार्यशालानां आयोजनद्वारा युवजनान् संस्कृतेन सह सम्बद्धान् कर्तुं विशेषप्रयत्नः भविष्यति। शिक्षकाणां, यूनां, प्रबुद्धनागरिकाणां कृते विशेषकार्यक्रमाः अपि आयोजयिष्यन्ते।संस्कृतसप्ताहस्य योजनाविषये चर्चायां निर्णयः जातः यत् कार्यक्रमाः केवलं विद्यालयेषु न सीमिताः भविष्यन्ति, अपितु समाजस्य विविधेषु वर्गेषु अपि प्रचालयिष्यन्ते। वातावरणनिर्माणाय नामलेखनं, प्रचारफलकस्थापनं, युवकार्यशालाः, जनसम्पर्ककार्यक्रमाः च आयोजयिष्यन्ते।उपवेशने आगामिनि द्वाविंशतितमे सेप्टेम्बरमासे हरिद्वारे आयोज्यमानस्य विस्तारकवर्गस्य कृते पञ्च व्यवस्थापिकानां व्यवस्था करणीयेति अपेक्षा कृता। तथा च एकोनत्रिंशत्तमे अक्टोबरमासात् प्रथमदिनाङ्कपर्यन्तं हिमाचलप्रदेशे आयोज्यमाने अखिलभारतीयोपवेशने अधिकाधिककार्यकर्तॄणां सहभागिता सुनिश्चितकर्तुं सर्वान् प्रेरितवन्तः। सुप्तकार्यकर्तृशक्तेः जागरणम् तथा पूर्वविस्तारकाणां स्फूर्तिसङ्गमस्य आयोजनमपि स्वीकृतम्। क्षेत्रीयसङ्घटनमन्त्री अवदत् यत् सामाजिककार्येण एव स्वविकासः भवति। अतः प्रत्येकः कार्यकर्ता समाजे सक्रियः भूत्वा संस्कृतानुकूलवातावरणनिर्माणे योगदानं ददातु। पत्राचारव्यवस्थायाः सुदृढीकरणं, जनपदमहानगरयोः पत्राचारप्रमुखनियुक्तिः तथा प्रभाविसंवादव्यवस्थायाः विकासः इत्येषु विषयेषु अपि विशेषेण बलं प्रदत्तम्। कार्यक्रमे प्रान्तकुटुम्ब-शिक्षणप्रमुखः नागेन्द्रव्यासः, विभागसंयोजकः डॉ प्रदीपसेमवालः, जनपदाध्यक्षः डॉ रामभूषणबिजल्वाणः, जनपदसम्पर्कप्रमुखः धीरजमैठाणी, डोईवालाखण्ड संयोजिका डॉ आनन्दजोशी, रायपुर-खण्डसंयोजिका डॉ बीनापुरोहितः, प्रो शालिनीगुप्ता, डॉ मनोजरावतः, तथा अन्ये बहवः कार्यकर्तारः उपस्थिताः आसन्।कार्यक्रमस्य समापनसमये विभागसंयोजकेन डॉ प्रदीपसेमवालेन सर्वेषां प्रति धन्यवादज्ञापनं, ध्येयमन्त्रो धीरजमैठाणिना गीतमानन्दजोशिना कल्याणमन्त्र उर्मिलया विहितः।

## माँ श्यामा-मन्दिरस्य व्यवस्थासु उत्थिताः प्रश्नाः: पेयजलम्, प्रक्षालनगृहम् (शौचालयः), स्वच्छता, प्रबन्धश्च—कदा भविष्यति उत्तरदायित्वम्?

**हिमसंस्कृतवार्ता- विश्व मोहन झा , दरभंगा**
कोटिशः श्रद्धाळूनां (श्रद्धालूनां) आस्थायाः केन्द्रस्य माँ श्यामा-मन्दिरस्य व्यवस्थाः अधिकृत्य एतेषु दिनेषु सामाजिक-माध्यमेषु (सोशल मीडिया) प्रसारितेन चलच्चित्रेण (वायरल वीडियो), चित्रैः, स्थानीयस्तरे उत्थापिताभिः शिकायतैश्च (आपत्तिभिः) अनेके गम्भीराः प्रश्नाः उत्थापिताः। पेयजलम्, प्रक्षालनगृहम्, स्वच्छता, कर्मचारिणां स्थितिः, दाने प्राप्तानां संसाधनानाम् उपयोगः, मन्दिरप्रशासनस्य कार्यशैली च इति एतान् सर्वान् विषयान् अधिकृत्य निरन्तरं चर्चाः भवन्त्यः सन्ति। तथापि, एतेषां दावानां स्वतन्त्रा पुष्टिः अधुना अवशिष्टा अस्ति, न्याससमित्याः विस्तृतः पक्षः अपि सार्वजनिकरूपेण समक्षं आगन्तुं अवशिष्टः अस्ति।



## जर्जरविद्यालयभवने भयभीताः पठन्ति संस्कृतविद्यालयस्य छात्राः

हिमसंस्कृतवार्ताः सत्येन्द्र पाठकः लखनऊ। बलरामपुर-जनपदस्य तुलसीपुरस्थे श्रीराधाकृष्ण-संस्कृतमाध्यमिकविद्यालये छात्राः जीर्णभवने अध्ययनं कर्तुं विवशाः सन्ति। निरन्तरवृष्टेः कारणात् विद्यालयस्य कक्षाणां छदः जलं स्रवति तथा प्लास्टरखण्डाः पतन्ति, येन छात्रेषु शिक्षकेषु च भयस्य वातावरणं विद्यमानम्।विद्यालयस्य प्रधानाचार्यः अनिलकुमारद्विवेदी अवदत् यत् विद्यालये १६० छात्राः पञ्जीकृताः सन्ति, तेषु ७५ छात्राः छात्रावासे निवसन्ति। सम्प्रति विद्यालयस्य सञ्चालनं जिला-पञ्चायतस्य भवने क्रियते। तेन उक्तं यत् वर्षाकाले छदसि जलसञ्चयात् कक्षासु जलस्रवणं भवति तथा प्लास्टरपतनात् छात्राणां सुरक्षायाः विषये चिन्ता वर्तते।शिक्षकैः छात्रैश्च उक्तं यत् वर्षाविरामानन्तरं छदसि सञ्चितं जलं स्वयमेव निष्कासयितव्यं भवति, तथापि प्लास्टरपतनस्य समस्या न निवर्तते। विद्यालयप्रशासनेन तहसील-जनपदप्रशासनयोः समीपे भवनस्य शीघ्रमरम्मतार्थं निवेदनं कृतम्, येन छात्राः सुरक्षितवातावरणे अध्ययनं कर्तुं शक्नुयुः।

# संघ-भाजपादलस्य समन्वयोपवेशने संगठन-सर्वकारयोःमध्ये सामंजस्यं प्रतिबलम्



देहरादूनम्, 27 जुलाईमासः (हि.स.)। भारतीयजनतापक्षस्य तथा राष्ट्रियस्वयंसेवकसङ्घस्य सोमवासरे अत्र सम्पन्नायां समन्वयोपवेशने आगामिविधानसभानिर्वाचनस्य सज्जता, केन्द्रराज्यसरकारयोः योजनानां जनजनपर्यन्तं प्रसारणम् तथा सङ्गठनसर्वकारयोः मध्ये उत्तमसमन्वयस्य विषये विस्तृतः विचारविमर्शः अभवत्। अस्य उपवेशनस्य विषये किमपि आधिकारिकवक्तव्यं न प्रकाशितं, किन्तु सूत्रैः ज्ञापितं यत् उपवेशने सङ्घस्य सहसरकार्यवाहः अरुणकुमारः तथा भारतीयजनतापक्षस्य राष्ट्रियसङ्गठनमहामन्त्री बीएलसन्तोषः सङ्गठनसम्बद्धविषयेषु मार्गदर्शनम् अददाताम्। उभाभ्यां नेतृभ्यां सङ्गठनस्य सुदृढीकरणे, कार्यकर्तॄणां सक्रियभूमिकायाम् तथा जनसम्पर्काभियानानाम् अधिकप्रभावीकरणे विशेषेण बलं दत्तम्। तथा आगामिनिर्वाचनान् दृष्ट्वा मतदानकेन्द्रस्तरपर्यन्तं सङ्गठनस्य अधिकसुदृढीकरणम्, सर्वकारस्य उपलब्धीनां सामान्यजनपर्यन्तं प्रसारणम् इत्यादिषु विविधेषु पक्षेषु चर्चा कृता।उपवेशने प्रदेशे सञ्चाल्यमानानां सङ्गठनात्मककार्यक्रमाणां समीक्षा अपि कृता। सरकारसङ्गठनयोः मध्ये उत्तमसंवादसमन्वयाभ्यां विकासकार्याणि जनकल्याणयोजनाश्च अधिकप्रभावीरीत्या जनतापर्यन्तं कथं प्राप्नुयुः इति विषये अपि मन्थनम् अभवत्। एतदतिरिक्तम् आगामिदिनेषु प्रस्तावितानां राजनैतिकसङ्गठनात्मककार्यक्रमाणां रूपरेखा तथा कार्यकर्तॄणां दायित्वविभागस्य विषये अपि चर्चा अभवत्।उपवेशने सङ्घस्य पश्चिमोत्तरप्रदेशक्षेत्रस्य प्रचारकः महेन्द्रः, प्रान्तप्रचारकः डॉ शैलेन्द्रः, भारतीयजनतापक्षस्य प्रदेशाध्यक्षः महेन्द्रभट्टः, भारतीयजनतापक्षस्य सहप्रभारी रेखावर्मा तथा भारतीयजनतापक्षस्य सङ्घस्य च विविधप्रदेशस्तरीयपदाधिकारी उपस्थिताः आसन्। सङ्गठनस्य विविधानाम् आनुषङ्गिकसङ्गठनानां प्रतिनिधयः अपि उपवेशने उपस्थिताः आसन्।सूत्रैः ज्ञापितं यत् उपवेशने सङ्गठनस्य आगामिकार्ययोजना, मतदानकेन्द्रस्तरे सक्रियतावृद्धिः, जनभागिताप्रधानकार्यक्रमाणां विस्तारः तथा कार्यकर्तृभिः सह नियमितसंवादस्य निरन्तरतायै विशेषः बलः दत्तः। तथा प्रदेशे सङ्गठनसर्वकारयोः समन्वयस्य अधिकसुदृढीकरणे अपि सर्वसम्मत्या सहमतिर्निर्मिता।

# डीपीएस बोकारो विद्यालये अन्तरसदनीय-समूह-तबला-वादन-प्रतियोगितया तथा एकल-गायन-प्रतियोगितया उत्साहपूर्णवातावरणे अभवत्




हिमसंस्कृतवार्ता, प्रेरकः च -सौरभः दे

## सांस्कृतिक-सप्ताहस्य शुभारम्भः

बोकारो : दिल्ली पब्लिक स्कूल, बोकारो-विद्यालये 'धरोहर २०२६' इति सांस्कृतिक-सप्ताहस्य शुभारम्भः अन्तरसदनीय-समूह-तबला-वादन-प्रतियोगितया तथा एकल-गायन-प्रतियोगितया उत्साहपूर्णवातावरणे अभवत्। विद्यालयस्य षट्-सदनानां छात्राः पूर्णोत्साहेन स्पर्धासु सहभागित्वं कृतवन्तः। भारतीय-सांस्कृतिक-परम्परायाः संरक्षणं संवर्धनञ्च छात्रैः प्रभावकरूपेण प्रदर्शितम्।समूह-तबला-वादन-प्रतियोगितायां दशमात्रात्मकः 'झपतालः' प्रस्तुतीकृतः, येन भारतीय-शास्त्रीय-सङ्गीतस्य समृद्धा परम्परा प्रकाशिता। एकल-गायन-प्रतियोगितायाः विषयः 'ग़ज़ल' आसीत्, यस्मिन् छात्रैः मधुरस्वरेण मनोहराः प्रस्तुतीः प्रदत्ताः। प्रतियोगितयोः निर्णायकत्वं प्राथमिक-विभागस्य अध्यापिकाभिः आभा कुमारी झा, प्रियङ्का तथा मयङ्क कुमार भक्त इत्येभिः कृतम्।एकल-गायन-प्रतियोगितायां यमुना-सदनस्य शम्भवी झा तथा सतलुज-सदनस्य आँचल पाठक संयुक्तरूपेण प्रथमस्थानम् अलभेताम्। चेनाब-सदनस्य अर्थित् सिंह तथा गङ्गा-सदनस्य मैत्रेयी सिन्हा संयुक्तरूपेण द्वितीयस्थानम् प्राप्तवन्तौ। झेलम्-सदनस्य पीयूष मल्लिकः तृतीयस्थानम् अलभत।
समूह-तबला-वादन-प्रतियोगितायां यमुना-सदनं प्रथमस्थानम्, झेलम्-सदनं द्वितीयस्थानम्, चेनाब-सदनं तृतीयस्थानञ्च प्राप्तवन्ति। विद्यालयस्य प्राचार्यः डॉ. ए. एस. गङ्गवारः विजेतॄन् अभिनन्द्य सर्वान् विद्यार्थिनः नियमिताभ्यासाय, निरन्तरसुधाराय तथा उत्कृष्टताप्राप्तये प्रेरितवान्। तेन उक्तं यत् प्रतिदिनं नूतनाः अवसराः प्राप्यन्ते, तेषां सदुपयोगः कर्तव्यः। उत्कृष्टतायाः निष्ठया एव समाजे राष्ट्रे च सकारात्मकः परिवर्तनः सम्भवति।

# भारत-नेपालसीम्नि 'वारिस पंजाब दे' संगठनस्य वाञ्छितः अभियुक्तः गृहीतः



हिमसंस्कृतवार्ताः- सत्येन्द्र पाठकः, लखनऊ।उत्तरप्रदेशस्य बहराइच-जनपदे भारत-नेपालसीम्नि सुरक्षासंस्थाभिः संयुक्तकार्यवाह्यां प्रतिबन्धित-सङ्गठनस्य 'वारिस पंजाब दे' इत्यस्य सम्बद्धः वाञ्छितः अभियुक्तः विक्रमजीतसिंहः गृहीतः। सः अन्येन सह नेपालदेशतः भारतदेशे अवैधरूपेण प्रवेष्टुं प्रयतमानः रूपईडीहा-सीम्नि निगृहीतः। प्राप्तसूचनानुसारं सशस्त्रसीमाबलस्य स्थानीय- आरक्षकस्य च संयुक्तकार्यवाह्यां एषा सफलता प्राप्ता। प्रारम्भिक-अनुसन्धाने ज्ञातं यत् विक्रमजीतसिंहः वर्षे २०२३ तमे अमृतसर- जनपदस्य अजनाला- थानाक्षेत्रे जातस्य आक्रमणस्य प्रकरणे वाञ्छितः अभियुक्तः आसीत् तथा नेपालदेशे निवसन् आसीत्। गृहीतयोः उभयोः विषये सुरक्षासंस्थाभिः सघनपृच्छा क्रियते। अनुसन्धानकाले अवैध-सीमाप्रवेशे सहयोगं कृतवन्तः केचन स्थानीयजनाः अपि निगृहीताः। सुरक्षासंस्थाः सम्पूर्णस्य जालकस्य (नेटवर्कस्य) अनुसन्धाने निरताः सन्ति तथा अभियुक्तानां सम्पर्कसूत्राणि, तेषां सहयोगिनश्च ज्ञातुं प्रयतन्ते। बहराइच-जनपदस्य पुलिस-अधीक्षकः विश्वजीत श्रीवास्तवः अवदत् यत् अस्य प्रकरणस्य सूचना पंजाब-पुलिसाय प्रदत्ता अस्ति। सर्वाः सम्बन्धिताः संस्थाः संयुक्तरूपेण सम्पूर्णप्रकरणस्य विस्तृतम् अनुसन्धनं कुर्वन्ति। सुरक्षासंस्थाभिः एषा कार्यवाही भारत-नेपालसीम्नि अवैधप्रवेश-निवारणस्य दिशि महती सफलता इति परिगणिता। अनुसन्धाने प्रचलति सति अस्य प्रकरणस्य अन्येऽपि तथ्याः शीघ्रमेव प्रकाशं गमिष्यन्ति।

## हिमाचलप्रदेशे भृशवृष्ट्या १०८ मार्गाः अवरुद्धाः, नदी-उपनद्यः उद्वेलिताः, एतावन्ति दिनानि वर्षिष्यन्ति मेघाः

हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशे विगतेषु दिनेषु जातायाः भृशवृष्टेः प्रभावः यथावतः तिष्ठति। सम्पूर्णप्रदेशे १०८ मार्गाः अवरुद्धाः सन्ति, यदा तु नव विद्युत्-परिवर्तकाः ३८ पेयजल-योजनाः च प्रभाविताः सन्ति। सोमवासरे अधिकांशजनपदेषु आदिनम् आतपः प्रखरः आसीत्, किन्तु सायङ्काले धर्मशालायां तीव्रवृष्टिः अभवत्। राजधान्यां शिमलायां रविवासररात्रौ जातायाः भृशवृष्टेः कारणात् पञ्च वृक्षाः अपतन्। कनलोगक्षेत्रे एकः वृक्षः कारवाहने पतनेन वाहनं क्षतिग्रस्तं जातं यदा तु मजयाठ-क्षेत्रे भूस्खलनस्य घटना सम्मुखीभूता। प्रदेशे नदी-उपनद्यः उद्वेलिताः सन्ति। जलस्तरस्य वृद्ध्या जटौन-वैराज-सेतोः द्वाराणि अपि उद्घाटनीयाः अभवन्।
ऋतुविज्ञानविभागेन मङ्गलवासरे शिमला- सोलन- सिरमौर- जनपदानां कतिपयेषु क्षेत्रेषु अकस्मात् प्लावनस्य आशङ्कां ज्ञापयित्वा जनाः नदी- उपनदीभ्यः दूरे स्थातुम् उपदिष्टाः। सोमवासरस्य सायङ्काले जातायाः तीव्रवृष्टेः मध्ये शाहपुरस्य बोहक्षेत्रस्य गढ़गूंनग्रामे सेनायाः सहायेन मलिनावशेष-अपसारणस्य कार्यं निरन्तरं प्रचलति। आश्रयकार्याणां वेलायां प्रभावितपरिवारेभ्यः गृहोपकरणानि अन्यवस्तूनि च अवकरात् निष्कास्यन्ते। ऋतुविज्ञानविभागेन मङ्गलवासरे बिलासपुर- सिरमौर- जनपदयोः भृशवृष्टेः नारङ्गसतर्कता अङ्किता।



## लौकिकन्यायकोशः
## ऊर्णनाभिन्यायः

ऊर्णनाभिः (जालनिर्माणकुशलः कृमिः) स्वस्य शरीरात् निर्गच्छता एकेन स्निग्धेन द्रव्येण जालं निर्माति। तथैव रीत्या जालस्य नाशं करोति। तथैव ईश्वरः स्वस्मात् जगतः निर्माणं करोति संहारम् अपि करोति। एकः एव ईश्वरः जगतः उपादानं निमित्तं च कारणम् इति सूचयितुम् अस्य न्यायस्य प्रयोगः भवति। अव्यक्तं ब्रह्म एव जगत् वयति।
**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः

## वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
अद्य पापुवानूगिनौ एका विचित्रा वार्ता श्रुता। वैज्ञानिकाः समुद्रे प्रवालभित्तिषु एकं नूतनं ग्राहविशेषं दृष्टवन्तः सन्ति। तेन महाग्राहेण न तीर्णम्, अपि तु पादाभ्यां चलितम्।
काव्या- नमस्ते नन्दिनि।
अहो, ग्राहेण चलितम् इति अतीव चित्रम्! अन्या आश्चर्यकरी वार्ता अमेरिका-राष्ट्रे जाता। एकस्मिन् राजमार्गे दुर्घटना जाता। ततः भारवाहनात् दशलक्ष-मधुमक्षिकाः मुक्ताः। ताभिः सम्पूर्णः मार्गः अवरुद्धः।
नन्दिनी- अहो! ताभिः मक्षिकाभिः जनाः न दष्टाः इति मन्ये। इदानीं भारतस्य उत्तरप्रदेशात् एका हास्यकरी वार्ता। तत्र तिसृभिः भगिनीभिः एकः एव चित्रग्राहकः परिणीतः। ताः कन्याः वियोगभयेन एकम् एव पतिं वृतवत्यः सन्ति। ताभिः पृथक् न स्थातव्यम् इति विचारितम्।
काव्या- आश्चर्यम्! एकाकिना नरेण तिस्रः पत्न्यः कथं पोषिताः इति न जाने।
अन्या वार्ता अपि भारतात् एव। विदेशस्थितेन पुत्रेण प्रतिमासं सप्तति- सहस्र- रूप्यकाणि पितृभ्यां प्रेषितानि, परन्तु तत् सर्वं धनं पितृभ्यां ग्राम्यसमितिषु निक्षिप्तम्। सुरक्षितकोषे न स्थापितम्।
नन्दिनी- तत् अतीव कष्टकरम्! वृद्धैः जनैः धनं न रक्षितम्। अस्तु, अद्यतनी वार्ता अत्रैव समाप्ता।